कृत् । विष्टम्भिनी न चक्षुष्या तद्गुणा चातिशष्कुली" ।

अथ पिष्टिका । दालिः संस्थापिता तोये ततोऽपहृतकञ्चुका । शिलायां साधु सम्पिष्टा पिष्टिका कथिता बुधैः

अथ (वेठड़) । माषपिष्टिकया पूर्णगर्भा गोधूमचूर्णतः । रचिता रोटिका सैव प्रोक्ता वेटमिका बुधैः । भवेद्वेटमिका बल्या वृष्या रुच्याऽनिलापहा । जघ्नसन्तर्पणी गुर्वी बृंहणी शुक्रला परम् । भिन्नमूत्रमला स्तन्यमेदःपित्तकफप्रदा । गुदकीलार्द्दितश्वासपङ्क्तिशूलानि नाशयेत् ।

अथ (पापर) धूमसी रचिता हिङ्गुहरिद्रालवणैर्युता । जीरकस्वर्जिकाभ्याञ्च तनूकृत्य च वेल्लिता । पर्प्पटास्ते सदाङ्गारभ्रष्टाः परमरोचकाः । दीपनाः पाचना रूक्षा गुरवः किञ्चिदीरिताः । मौद्गाश्च तद्गुणाः प्रोक्ता विशेषाल्लघवो हिताः । चनकस्य गुणैर्युक्ताः पर्प्पटाश्चनकोद्भवाः । स्नेहभ्रष्टास्तु ते सर्वे भवेयुर्मध्यमा गुणैः ।

अथ (पूरी) । माषाणां पिष्टिका पूर्य्या लवणार्द्रकहिङ्गुभिः । तया पिष्टिकया पूर्णा समिताकृतपोलिका । ततस्तैलेन पक्वा सा पूरीका कथिता बुधैः । रुच्या स्वाद्वी गुरुः स्निग्धा बल्या पित्तास्रदूषिका । चक्षुस्तेजोहरी चोष्णा पाके वातविनाशिनी । तथैव घृतपक्वापि चक्षुष्या रक्तपित्तहृत् ।

अथ (वरा) । माषाणां पिष्टिका युक्ता लवणार्द्रकहिङ्गुभिः । कृत्वा विदध्याद्वटकांस्तांस्तैले पचेच्छनैः । विशुष्का वटका बल्या बृंहणी वीर्य्यवर्द्धनी । वातामयहरा रुच्या विशेषादर्द्दितापहा । विबन्धभेदिनी श्लेष्मकारिणीऽप्यग्निपूजिता। संचूर्ण्य निक्षिपेत्तक्रे भ्रष्टं जीरकहिङ्गुभिः । लवणं तत्र वटकान् सकलानपि मज्जयेत् । शुक्रलस्तत्र वटको बलकृद्रोचनो गुरुः । विबन्धहृद्विदाही च श्लेष्मलः पवनापहः । राज्यक्तपातिनो वान्यान् पाचनांस्तांस्तु भक्षयेत् राज्यक्ता (राइता) इति लोके ।

अथ (काञ्जीवरा) । मन्थनी नूतना धार्य्या कटुतैलेन लेपिता । निर्म्मलेनाम्बुनापूर्य्य तस्यां चूर्णं विनिःक्षिपेत् । राजिकाजीरलवणहिङ्गुशुण्ठीनिशाकृतम् । निःक्षिपेद्वटकांस्तत्र भाण्डस्यास्यञ्च मुद्रयेत् । ततो दिनत्रयादूर्द्ध्वमम्लाः स्युर्वटका ध्रुवम् । काञ्जिको वटको रुच्यो वातघ्नः श्लेष्मकारकः । शीतो दाहं शूलमजीर्णं हरते दृगामयेष्वहितः ।

(उरीदवडा) । अम्लिकां स्वेदयित्वा तु जलेन सह मर्द्दयेत् । तन्नीरे कृतसंस्कारे वटकान्मज्जयेज्जनः । अम्लिका वटकास्ते तु रुच्या वह्निप्रदीपनाः । वटकस्य गुणैः पूर्वैं रेषोऽपि च समन्वितः ।

अथ (मुगवडा) मुद्गानां वटकास्तद्वत् (ताओया) भर्जिता लघवो हिमाः । संस्कारजप्रभावेन त्रिदोषशमना हिताः ।

अथ (माषवडा) माषाणां पिष्टिका हिङ्गुलवणार्द्रकसंस्कृता । तया विरचिता वस्त्रे वटिकाः साधुशोषिताः । भर्जितास्तप्ततैलेन अथवाम्बुप्रयोगतः । वटकस्य गुणैर्युक्ता ज्ञातव्या रुचिदा भृशम् ।

अथ (कोँहडावडी) । कूष्माण्डकवटी ज्ञेया पूर्वोक्तवटिकागुणाः । विशेषात्पित्तरक्तघ्नी लघ्वी च कथिता बुधैः ।

अथ (मुद्गवटी) मुद्गानां वटिका तद्वद्रचिता साधिता तथा । पथ्या रुच्या तथा लघ्वी मुद्गसूपगुणा स्मृता ।

(चरिकवच्छ) । माषपिष्टिकया लिप्तं नागवल्लीदलं महत् । तत्तु संस्वेदयेत् युक्त्या स्थाल्यामास्तारकोपरि । ततो निष्काश्य तं खण्डंस्ततस्तैलेन भर्जयेत् । खण्डञ्च खण्डेन योग्यमिति यावत् । अलीकमत्स्य उक्तोऽयं प्रकारः पाकपण्डितैः । तं वृन्ताकभटित्रेण वास्तूकेन च भक्षयेत् ।

अथ (कडी) । स्थाल्यां घृते वा तैले वा हरिद्राहिङ्गु भर्जयेत् । अवलेहनसंयुक्तं तक्रन्तत्रैव निःक्षिपेत् । एषा सिद्धा समरीचा कथिता कथिता बुधैः । अवलेहनम् । (अरिहन) इति लोके । कथिता पाचनी रुच्या लघ्वी वह्निप्रदीपनी । कफानिलविबन्धघ्नी किञ्चित्पित्तप्रकोपिणी । अलीकमत्स्याः शुष्का वा किं वा कथितया पुनः । बृंहणा रोचना वृष्या बल्या वातगदापहाः । कोष्ठशुद्धिकराः शुक्राः किञ्चित्पित्तप्रकोपनाः । अर्द्दिते सहतुस्तम्भे विशेषेण हिताः स्मृताः ।

अथ (आदवरा) । मुद्गपिष्टविरचितान् वटांस्तैलेन पाचितान् । हस्तेन चूर्णयेत्सम्यक् तस्मिंश्चूर्णे विनिःक्षिपेत् । भ्रष्टहिङ्ग्वार्द्रकं सूक्ष्मं मरीचं जीरकं तथा । निम्बूरसं यवानीं च युक्त्या सर्वं विमिश्रयेत् । मुद्गपिष्टं पचेत्सम्यक् स्थाल्यामास्तारकोपरि । तस्मात्तु गोलकं कुर्य्यात् तन्मध्ये पूरणं क्षिपेत् । तैले तान् गोलकान् पक्वा कथितायां निमज्जयेत् । गोलकाः पाचकाः प्रोक्तास्ते त्वार्द्रकैर्वटा अपि । मुद्गार्द्रकवटा रुच्याः लघवो बलकारकाः । दीपनास्तर्पणाः पथ्यास्त्रिषु दोषेषु पूजिताः ।

(पकौरी) दालयश्चनकानान्तु निस्तुषा यन्त्रपेषिताः । तच्चूर्णं वेशनं प्रोक्तं पाकशास्त्रविशारदैः । वटिका वेशनस्यापि कथितायां निमज्जिताः । रुच्या विष्टम्भजननी बल्या